# सुन्दरकाण्ड एकादश सर्गः(११) - ॥ पानभूमिविचयः ॥

अवधूय च तां बुद्धिं बभूवा वस्थितस् तदा ।
जगाम चापरां चिन्तां सीतां प्रति महाकपिः ॥ १ ॥

न रामेण वियुक्ता सा स्वप्तु मर्हति भामिनी ।
न भोक्तुं नाप्यलङ्कर्तुं न पान मुपसेवितुम् ॥ २ ॥

नान्यं नरमुपस्थातुं सुराणामपि चेश्वरम् ।
न हि राम समः कश्चिद् विद्यते त्रिदशेष्वपि ॥ ३ ॥

अन्येय मिति निश्चित्य पान भूमौ चचार सः ।
क्रीडिते नापराः क्लान्ता गीतेन च तथा पराः ॥ ४ ॥

नृत्तेन चापराः क्लान्ताः पान विप्र हतास् तथा ।
मुरवेषु मृदङ्गेषु पीठिकासु च संस्थिताः ॥ ५ ॥

तथास्तरण मुख्येषु संविष्टाश् चापराः स्त्रियः ।
अङ्गनानां सहस्रेण भूषितेन विभूषणैः ॥ ६ ॥

रूप सँल्लाप शीलेन युक्त गीतार्थ भाषिणा ।
देश कालाभि युक्तेन युक्त वाक्याभि धायिना ॥ ७ ॥

रताभिरत संसुप्तं ददर्श हरियूथपः ।
तासां मध्ये महाबाहुः शुशुभे राक्षसेश्वरः ॥ ८ ॥

गोष्ठे महति मुख्यानां गवां मध्ये यथा वृषः ।
स राक्षसेन्द्रः शुशुभे ताभिः परिवृतः स्वयम् ॥ ९ ॥

करेणुभिर् यथारण्ये परिकीर्णो महाद्विपः ।
सर्वकामै रुपेतां च पानभूमिं महात्मनः ॥ १० ॥

ददर्श हरि शार्दूलस् तस्य रक्षःपतेर्गृहे ।
मृगाणां महिषाणां च वराहाणां च भागशः ॥ ११ ॥

तत्र न्यस्तानि मांसानि पान भूमौ ददर्श सः ।
रौक्मेषु च विशालेषु भाजनेष्वर्ध भक्षितान् ॥ १२ ॥

ददर्श हरिशार्दूलो मयूरान् कुक्कुटांस् तथा ।
वराह वार्ध्राण सकान् दधि सौवर्चला युतान् ॥ १३ ॥

शल्यान् मृग मयूरांश्च हनुमा नन्व वैक्षत ।
क्रकरान् विविधान् सिद्धांश् चकोरा नर्धभक्षितान् ॥ १४ ॥

महिषानेक शल्यांश्च छागांश्च कृत निष्ठितान् ।
लेह्या नुच्चावचान् पेयान् भोज्यानि विविधानि च ॥ १५ ॥

तथाम्ल लवणोत्तंसैर् विविधै राग षाडवैः ।
हार नूपुर केयूरै रपविद्धैर् महाधनैः ॥ १६ ॥

पान भाजन विक्षिप्तैः फलैश्च विविधैरपि ।
कृत पुष्पोप हारा भूरधिकं पुष्यति श्रियम् ॥ १७ ॥

तत्र तत्र च विन्यस्तैः सुश्लिष्टैः शयनासनैः ।
पानभूमिर् विना वह्निं प्रदीप्ते वोपलक्ष्यते ॥ १८ ॥

बहु प्रकारैर् विविधैर् वर संस्कार संस्कृतैः ।
मांसैः कुशल सम्युक्तैः पानभूमि गतैः पृथक् ॥ १९ ॥

दिव्याः प्रसन्ना विविधाः सुराः कृतसुरा अपि ।
शर्करासव माध्वीक पुष्पासव फलासवाः ॥ २० ॥

वास चूर्णैश्च विविधैर् दृष्टा स्तैस्तैः पृथक् पृथक् ।
सन्तता शुशुभे भूमिर् माल्यैश्च बहु संस्थितैः ॥ २१ ॥

हिरण्मयैश्च विविधैर् भोजनैः स्फाटिकै रपि ।
जाम्बूनद मयैश्चान्यैः करकैरभि संवृता ॥ २२ ॥

राजतेषु च कुम्भेषु जाम्बूनद मयेषु च ।
पानश्रेष्ठं तदा भूरि कपिस् तत्र ददर्श ह ॥ २३ ॥

सोऽपश्यच्छात कुम्भानि शीधोर् मणिमयानि च ।
राजतानि च पूर्णानि भाजनानि महाकपिः ॥ २४ ॥

क्वचिदर्धाव शेषाणि क्वचित् पीतानि सर्वशः ।
क्वचिन्नैव प्रपीतानि पानानि स ददर्श ह ॥ २५ ॥

क्वचिद् भक्ष्यांश्च विविधान् क्वचित् पानानि भागशः ।
क्वचिदन्ना वशेषाणि पश्यन्वै विचचार ह ॥ २६ ॥

शयनान्यत्र नारीणां शुभ्राणि बहुधा पुनः ।
परस्परं समाश्लिष्य काश्चित् सुप्ता वराङ्गनाः ॥ २७ ॥

काश्चिच्च वस्त्रमन्यस्याः स्वपन्त्याः परिधाय च ।
आहृत्य चाबलाः सुप्ताः निद्राबल पराजिताः ॥ २८ ॥

तासा मुच्छ्वास वातेन वस्त्रं माल्यं च गात्रजम् ।
नात्यर्थं स्पन्दते चित्रं प्राप्य मन्द मिवानिलम् ॥२९ ॥

चन्दनस्य च शीतस्य शीधोर् माधुरसस्य च ।
विविधस्य च माल्यस्य धूपस्य विविधस्य च ॥ ३० ॥

बहुधा मारुतस्तत्र गन्धं विविध मुद्वहन् ।
रसानां चन्दनानां च धूपानां चैव मूर्छितः ॥ ३१ ॥

प्रववौ सुरभिर् गन्धो विमाने पुष्पके तदा ।
श्यामा वदातास् तत्रान्याः काश्चित्कृष्णा वराङ्गनाः ॥ ३२॥

काश्चित् काञ्चन  वर्णाङ्ग्यः प्रमदा राक्षसालये ।
तासां निद्रावशत्वाच्च मदनेन च मूर्छितम् ॥ ३३ ॥

पद्मिनीनां प्रसुप्तानां रूप मासीद् यथैव हि ।
एवं सर्व मशेषेण रावणान्तःपुरं कपिः ॥ ३४ ॥

ददर्श सुमहा तेजा न ददर्श च जानकीम् ।
निरीक्षमाणश्च तदा ताः स्त्रियः स महाकपिः ॥ ३५ ॥

जगाम महतीं चिन्तां धर्मसाध्वस शङ्कितः ।
परदारा वरोधस्य प्रसुप्तस्य निरीक्षणम् ॥ ३६ ॥

इदं खलु ममात्यर्थं धर्मलोपं करिष्यति ।
न हि मे परदाराणां दृष्टिर् विषय वर्तिनी ॥ ३७ ॥

अयं चात्र मया दृष्टः परदार परिग्रहः ।
तस्य प्रादु रभूच्चिन्ता पुनरन्या मनस्विनः ॥ ३८ ॥

निश्चि तैकान्त चित्तस्य कार्य निश्चय दर्शिनी ।
कामं दृष्टा मया सर्वा विश्वस्ता रावण स्त्रियः ॥ ३९ ॥

न हि मे मनसः किञ्चिद् वैकृत्यमुपपद्यते ।
मनो हि हेतुः सर्वेषा मिन्द्रियाणां प्रवर्तने ॥ ४० ॥

शुभाशुभास्व वस्थासु तच्च मे सुव्यवस्थितम् ।
नान्यत्र हि मया शक्या वैदेही परिमार्गितुम् ॥ ४१ ॥

स्त्रियो हि स्त्रीषु दृश्यन्ते सर्वथा परिमार्गणे ।
यस्य सत्त्वस्य या योनिस् तस्यां तत् परिमार्ग्यते ॥ ४२ ॥

न शक्या प्रमदा नष्टा मृगीषु परिमार्गितुम् ।
तदिदं मार्गितं तावच् छुद्धेन मनसा मया ॥ ४३ ॥

रावणान्तःपुरं सर्वं दृश्यते न च जानकी ।
देव गन्धर्व कन्याश्च नागकन्याश्च वीर्यवान् ॥ ४४ ॥

अवेक्षमाणो हनुमान् नैवापश्यत जानकीम् ।
तामपश्यन् कपिस्तत्र पश्यंश् चान्या वर स्त्रियः ॥ ४५ ॥

अपक्रम्य तदा वीरः प्रध्यातु मुपचक्रमे ।
स भूयस्तु परं श्रीमान् मारुतिर् यत्न मास्थितः ।
आपान भूमि मुत्सृज्य तद् विचेतुं प्रचक्रमे ॥ ४६ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकादशः सर्गः ॥ ११ ॥